## चिण् ते पदः। (६०/२५१३)

'पद गतौ' (धा. पा. ११७०), अस्माद् [1]धातोः परस्य च्लेः चिणादेशो भवति तशब्दे परतः। सामर्थ्यादात्मनेपदैकवचनं गृह्यते। उदपादि [2]सस्यम्। समपादि [3]भैक्षम्। त इति किम्? उदपत्साताम्। उदपत्सत॥

## दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्। (६१/२३२८)

चिण् ते इति वर्तते। 'दीपी दीप्तौ' (धा. पा. ११५१), 'जनी प्रादुर्भावे' (धा. पा. ११५०), 'बुध अवगमने' (धा. पा. ११७३), 'पूरी आप्यायने' (धा. पा. ११५२), 'तायृ सन्तानपालनयोः' (धा. पा. ४८९), '[4]ओप्यायी वृद्धौ' (धा. पा. ४८८), एतेभ्यः परस्य च्लेः तशब्दे परतोऽन्यतरस्यां चिणादेशो भवति। अदीपि, अदीपिष्ट। अजनि, अजनिष्ट। अबोधि, अबुद्ध। अपूरि, अपूरिष्ट। अतायि, अतायिष्ट। अप्यायि, अप्यायिष्ट॥

## अचः कर्मकर्तरि। (६२/२७६८)

अजन्ताद् धातोः परस्य च्लेः [5]कर्मकर्तरि तशब्दे परतः चिणादेशो भवति। प्राप्तविभाषेयम् (३.१.८७/२७६६)। [6]अकारि कटः स्वयमेव, अकृत कटः स्वयमेव। अलावि केदारः स्वयमेव, अलविष्ट केदारः स्वयमेव। अचः इति किम्? अभेदि [7]काष्ठं स्वयमेव। कर्मकर्तरि इति किम्? अकारि कटो देवदत्तेन॥

## दुहश्च। (६३/२७६९)

'दुह प्रपूरणे' (धा. पा. १०१५), [8]अस्मात् परस्य[9] च्लेः चिणादेशो[10] भवत्यन्यतरस्याम्। अदोहि गौः स्वयमेव, अदुग्ध गौः स्वयमेव। कर्मकर्तरि इत्येव, अदोहि गौर्गोपालकेन॥

## न रुधः। (६४/२७७०)

'रुधिर् आवरणे' (धा. पा. १४३९), अस्मात् परस्य च्लेः कर्मकर्तरि[11] चिणादेशो न भवति। अन्ववारुद्ध गौः स्वयमेव। कर्मकर्तरि इत्येव, अन्ववारोधि गौः गोपालकेन॥

## तपोऽनुतापे च। (६५/२७६०)

न इति वर्तते। 'तप सन्तापे' (धा.पा. ९८६), अस्मात् परस्य च्लेः चिणादेशो न भवति[12] कर्मकर्तरि अनुतापे च। अनुतापः पश्चात्तापः। तस्य [13]ग्रहणमकर्मकर्त्रर्थं, तत्र हि भावकर्मणोरपि प्रतिषेधो भवति। [14]अतप्त तपस्तापसः। [15]अन्ववातप्त पापेन कर्मणा॥

---

1. धातोः नास्ति ह. 2. सस्यम् अ. 3. भैक्ष्यम् ड. 4. स्फायी क. ड. 5. अन्यतरस्याम् इत्यधिकम् अ. क. 6. चिण् भावकर्मणोः इति नित्यं प्राप्तम् इत्यधिकम अ. 7. कोष्ठः ड. 8. इति इत्यधिकम् क. 9. धातोः इत्यधिकम् ड. 10. कर्मकर्तरि तशब्दे इत्यधिकम् अ. क. ह, कर्मकर्तरि तशब्दे परतः इत्यधिकम् ड. 11. शब्दे परतः इत्यधिकम् ह. 12. तशब्दे परतः इत्यधिकम् ड. 13 करणम् ग. 14. अन्वतप्त ड. 15. अनुतापे इत्यधिकम् क. ड.